International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 38-40
© 2025 IJMH
www.themultijournal.com
Received: 22-11-2025
Accepted: 29-11-2025
Publish : 02-12-2025

**L.Sudeendhra**
न्यायवेदान्तविभागप्राध्यापकः,
पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा,
बेङ्गलूरु, कर्णाटकम्- 560028

**Correspondence:**
**L.Sudeendhra**
न्यायवेदान्तविभागप्राध्यापकः,
पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा,
बेङ्गलूरु, कर्णाटकम्- 560028

# न्यायमतरीत्या शाब्दबोधविचार:

**L.Sudeendhra**

" [i]**प्रदीप: सर्वविद्यानाम् उपाय: सर्वकर्मणाम् आश्रय: सर्वधर्माणाम् शस्वदान्वीक्षिकीमता:"** अष्टादश-विद्यास्थानेषु अभ्यर्हिततमा आन्वीक्षिकी। सेयं तर्कशास्त्रम् इति व्यपदिश्यते। न्यायवैशेषिकदर्शननाम्ना द्वेधा विभज्यन्ते इदं शास्त्रम् ॥ जानन्त्येव सर्वे न्यायवैशेषिकशास्त्रयो: सम्यक् व्युत्पत्तिमन्तरा इतरेषां शास्त्राणाम् अध्ययनं अध्यापनं वा सर्वतोभावेन दु:शकमिति। प्रसिद्धं हि **"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्"** इति। तत्र न्यायशास्त्रस्य प्रवर्तक: गौतम:, अक्षपाद: इति नामान्तरम्। वैशेषिक-दर्शनस्य कर्ता कणाद:। सूत्रमूलकमिदं दर्शनद्वयं भाष्यवार्तिकटीकाभि: समलङ्कृतम् ॥ अनयो: दर्शनयो: परस्परोपकारतया गच्छता कालेन सम्मेलनं जातम्। काणाददर्शनं प्रमेयप्रधानम् । न्यायदर्शनम्, प्रमाणप्रधानम्। तदिदं न्यायदर्शनं प्राचीनन्यायदर्शनम् नवीनन्यायदर्शनम् इति द्वेधा विभज्य व्यवहरन्ति। गङ्गेशोपाध्यायकृततत्त्वचिन्तामणे: प्राक्तना: ग्रन्था: "प्राचीनन्याय" इति (मणिग्रन्थ:) तत: पश्चात्तना: ग्रन्थाश्च नव्यन्याय इति च व्यपदिश्यन्ते, गङ्गेशोपाध्याय: नव्यन्यायस्य प्रवर्तक:, रघुनाथशिरोमणि: जगदीशतर्कालङ्कार:, गदाधरभट्टाचार्य: एते नव्यन्यायमूर्धन्या: परिगण्यन्ते ॥ कणाद: वात्स्यायन: श्रीधर: एते प्राचीनन्यायसम्प्रदाय प्रवर्तका:। उदयनाचार्य: तु उभयो: सङ्गमे विराजते।

## प्रमाणानि कति इति जानीम:

एतावता प्रबन्धेन न्यायशास्त्रस्य परम्परा निरूपिता ॥ इदानीं प्रामाणमधिकृत्य किञ्चिदुच्यते न्याय-शास्त्रे [ii]प्रत्यक्षानुमानोपमानशब्दा: प्रमाणानि। एष्वन्यतम: शब्द:। प्राय: व्यवहारे शब्दप्रमाणमेव प्राधान्यं भजते। अथापि शब्दात् कथं बोध: भवति? स च बोध: कीदृश:?इत्यत्र महती जिज्ञासा भारतीय-दार्शनिकेषु वरीवर्ति। तत्र प्रमाणमीमांसानिपुणानां नैयायिकानां मतमत्र निरूप्यते। प्रकृतलेखने शब्दप्रमाणं, तथा शाब्दबोधविषयमधिकृत्य सङ्क्षेपत: निरूप्यते॥

तार्किकैकदेशिन: वैशेषिका: शब्दस्य पृथक्प्रामाण्यमेव नाभ्युपगच्छन्ति । यथा लिपिं दृष्ट्वा शब्द: अनुमीयते तथा शब्दं श्रुत्वा वक्तुरभिप्राय: अनुमीयते इति तेषां वाद:। सोऽयं वाद: अनुभवैकशरण: इति नात्र प्रबलानुपपत्तिरुद्घाटिता नैयायिकै: । केवलं "शब्दादमुमर्थं प्रत्येमि" इति अनुव्यवसायं प्रमाणीकृत्य शब्दस्य पृथक् प्रामाण्यं समर्थितम्।

**न्यायमते शब्दप्रमाणोल्लेख: प्राचीनग्रन्थेषु दृश्यते**

[iii]आप्तोपदेश: शब्द: - जयन्त भट्ट:

[iv]आप्तवाक्यं शब्द: - अन्नंभट्ट:

[v] आप्तोपदेशसामर्थ्याच्छब्दात् अर्थसम्प्रत्यय: - गौतम सूत्रम्

## शाब्दबोधोत्पत्तिक्रम:

अथ कथं शब्दात् बोधो जायते? शाब्दबोधोत्पत्ति क्रमस्तु कथं? इत्थम् –

[vi]**"पदज्ञानं तु करणं द्वारं तत्र पदार्थधी: । शाब्दबोध फलं तत्र शक्तिधी:सहकारिणी"**। इति वचनरीत्या भवति ॥

## तत्र शाब्दबोधे सहकारिण:

1} आकाङ्क्षा - पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयानुभावकत्वम् आकाङ्क्षा। आकाङ्क्षारहितं वाक्यं न प्रमाणम् । उदा:- यथा गौ: अश्व: पुरुषो हस्ति इति वाक्यं न प्रमाणम् आकाङ्क्षाविरहात्

2} योग्यता - अर्थाबोधो योग्यता । उदा:- अग्निना सिञ्चति इति वाक्यं न प्रमाणम् योग्यता विरहात्

3} सन्निधि: - पदानामविलम्बेन उच्चारणं सन्निधिः। उदा:- प्रहरे प्रहरे असहोच्चारितानि गामानय इत्यादिपदानि न प्रमाणम् सानिध्य-भावात् ॥

**न्यायमते वाक्यं द्विविधम्**

**वाक्यं द्विविधम् वैदिकम् , लौकिकम् च । वैदिकम् ईश्वरोक्तत्वात् सर्वमपि प्रमाणम् । लौकिकं तु आप्तवाक्यं प्रमाणम्। अन्यदप्रमाणम्॥**

नैयायिका: वेद: अपौरुषेय: इति न अभ्युपयन्ति ईश्वररचित: वेद:॥ ईश्वरश्च सर्वज्ञः। तस्य भ्रम: नास्ति । अत: तदुक्त: वेद: सर्वोपि प्रमाणम् । वेदातिरिक्तम् अस्मादादिवाक्यं लौकिकम्।

अस्माकं तु कदाचित् मिथ्याज्ञानमपि भवति । मिथ्याज्ञानकाले वयं अनाप्ता:, तदा अस्मद्वाक्यं न प्रमाणम् । यथार्थज्ञानपूर्वकं उच्चरितमेव अस्मद्वाक्यं प्रमाणम् । वाक्यम् द्विविधम् , वैदिकम्,, लौकिकम् च । वैदिकम् ईश्वरोक्तत्वात् सर्वमपि प्रमाणम् । लौकिकम् तु आप्तवाक्यम् प्रमाणम् । अन्यदप्रमाणम् । आकाशगुण: शब्द: । स च प्रथमं श्रोत्रेण गृह्यते । तत: तदर्थ: स्मर्यते । तत: स्मृतयो: अर्थयो: सम्बन्ध: ज्ञायते । स च सम्बन्ध: अन्वय: इत्युच्यते। तद्यथा "गाम् आनयति " इति वाक्ये गोपदम् , अम् विभक्तिः, नी धातु:, ति प्रत्यय: इति आहत्य चत्वारि पदानि सन्ति। पदश्रवणक्रमेण तत्तत्पदार्था: स्मर्यन्ते । तत: पदार्थानाम् अन्वय: बुद्ध्यते। गोरूपस्य अर्थस्य "अम्" पदार्थे आधेयत्वं संसर्ग: । ततश्च "गोनिष्ठकर्मत्वं" इति बोध:। कर्मत्वस्य जनकता सम्बन्ध: आनयनक्रियायाम् , क्रियायाश्च आख्यातार्थकृतौ अनुकूलता सम्बन्ध: । तथा च गोनिष्ठकर्मताजनकानयनानुकूला कृति:। तद्वांश्च चैत्रादिरिति शाब्दबोध:।

**प्राचीननवीनयो: अभिप्राय भेद:**

अत्रायं मतभेदः- क्रमशः पदे श्रुते तत्क्रमेणैव अर्थाः स्मर्यन्ते । स्मृताः अर्थाः परस्परम् अन्वीयन्ते । सोऽयम् अन्वयबोधक्रमः खलेकपोत-न्यायम् अनुसरति । यथा "[vii]**वृद्धाः, युवानः, शिशवः, कपोताः, कणलोभेन युगपत् खले पतन्ति, तथा प्रथमम्, अनन्तरं पश्चात् स्मृताः पदार्थाः युगपत् अन्वीयन्ते**" । नात्र परन्तु अनेकपदघटिते वाक्ये तावन्तः अर्थाः कथं युगपत् स्मृतिपथं गच्छन्ति ? इति अस्मिन् मतेऽनुपपत्तिः परिस्फुरति ।

अपरश्चायं पक्षः - 'गाम्' इति कारकपदे श्रुते प्रातिपदिकेन विभक्त्या च स्मृतयोः अर्थयोः प्रथमम् अन्वयः बुद्ध्यते। अयं **खण्डवाक्यार्थबोधः** इत्युच्यते। एवम् 'आनयति' इति वाक्यात् 'आनयनानुकूला कृतिः' इति च बोधः जायते । अयमप्यपरो खण्ड-वाक्यार्थबोधः । ततः 'गोकर्मक-आनयनानुकूला कृतिः' इति **अखण्डवाक्यार्थबोधः** जायते । इत्थम् सर्वत्र [viii]**खण्डवाक्यार्थबोध-पूर्वकमेव महावाक्यार्थबोधो भवतीति**

उक्तं हि मुक्तावल्याम्

**यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते**
**तेन तेनान्वित: स्वार्थ: पदै: एव अवगम्यते**

**न्यायमते अन्वये शक्तिं नाभ्युपगच्छन्ति , दर्शनान्तरे अन्विते शक्तिं अङ्गीकुर्वन्ति**

अयं च दीर्घो विवाद: भारतीयदार्शनिकेषु वरीवर्ति-अन्वय: कथं शाब्दबोधो भासते? इति शब्दात् जायमानः बोधः शाब्दबोधः। तस्मिंश्च बोधे शब्दशक्य एव विषयः भवितुमर्हति । यदि चान्वयः अशक्यः स्यात् तर्हि शाब्दबोधे न भासेत । तस्मात् अन्वयेऽपि अस्ति पदानां शक्तिः । ततश्चान्वितेऽर्थे पदानां शक्तिः। अयं च पक्षः मीमांसकानाम्। द्वैतवादोऽपि अमुमेव पक्षं कक्षीकरोति। परन्तु अयं विशेषः- मीमांसकाः विशेषान्विते शक्तिं स्वीकुर्वन्ति । [ix]**आनन्दतीर्थीयाः** पुनः योग्येतरान्विते स्वार्थे। यथा 'गाम् आनय' इति वाक्ये गोपदम् आनयनान्वितां गां वक्ति इति मीमांसकसिद्धान्तः। इतरा-न्वितां गां वक्ति इति द्वैतिनां वादः। स च इतरः कः ? इति जिज्ञासायाम् आनयपदम् आनयनरूपां क्रियां ब्रूते । इत्थं योग्येतरान्विते स्वार्थे शक्तानि पदानि पदान्तरसमभिव्याहाररूप-सामग्री बलात् विशेषान्वितान् स्वार्थान् अभिदधति। इति द्वैतिनां वादः।

नैयायिकानां पुनः अयमाशयः अनन्यलभ्यः शब्दार्थः । शब्दानां तत्रैव शक्तिः योऽर्थः अन्येन लभ्यो न भवति । अन्वयः पुनः अन्यलभ्यः । [x]**आकाङ्क्षा, योग्यता सन्निधिबलात् अन्वयः** ज्ञायते ।

उक्तं हि कारिकावल्याम् शब्दखण्डे –

**आसत्तिर्योग्यताकाङ्क्षा तात्पर्यज्ञानमिष्यते**

तद्यथा- 'गाम्' इति श्रुते गवि कर्मत्वं ज्ञायते । तच्च कर्मत्वं क्रिया-निरूप्यम् । कात्र क्रिया इति आकाङ्क्षा ज्ञायते । तदानीं 'आनय' इति पदेन आनयनरूपा क्रिया उपस्थापिता । इयेमव सन्निधिः। गौश्च आनेतुं शक्या । अतः आनयनान्वययोग्यतापि गवि अस्ति । इत्थं चाकाङ्क्षादिवशात् गोनिष्ठकर्मत्वस्य आनयनक्रियायाश्च सम्बन्धः भासते। स सम्बन्ध एव अन्वयः। ततश्चान्वयः शक्तिं विनापि लभ्यत इति कारणतः पदानां नान्वये शक्तिः, किन्तु स्वार्थमात्रे। येप्यन्वये शक्तिमास्थिषत तेषामपि अन्वयविशेषलाभार्थं पदान्तरसमभि-व्या-हार अपेक्षित एव । ततश्च किम् अन्वये शक्तिकल्पनेन? पदार्थमात्रे शक्तानि पदानि समभिव्याहारवशात् अन्वयं बोधयन्तु। तस्मात् नान्वये शक्तिः इति।

**शाब्दबोधोत्पत्ति क्रम:**

[xi]शाब्दबोधे भासमानश्चान्वयः द्विविधः- अभेदः, तदतिरिक्तश्च । समानविभक्तिकपदस्थले अभेदः संसर्गतया भासते। यथा 'नीलो घटः' इत्यत्र नीलपदार्थस्य नीलरूपविशिष्टस्य घटपदार्थे घटे अभेदेना-न्वयः। एवं 'स्तोकं पचति' इत्यत्रापि स्तोकपदार्थस्य पच् धात्वर्थे पाके अभेदेनान्वयः। अन्यत्र सर्वत्राभेदातिरिक्तः संसर्गः । स च क्वचित् जन्यजनकभावः। यथा, 'पचति' इत्यत्र पच् धात्वर्थपाकक्रियायाः तिप्रत्ययार्थे यत्ने जनकतासम्बन्धेनान्वयः। पाकक्रिया शरीरनिष्टः परिस्पन्दविशेषः। तस्याः जनकः आत्मनिष्ठो यत्न: । सच तिप्रत्य-यस्यार्थः ॥

क्वचिच्चायं सम्बन्धः आधाराधेयभावः। यथा-'ग्रामं गच्छति' इत्यत्र 'ग्रामम्' पदोत्तरद्वितीयायाः गमनजन्यसंयोगरूपं फलमर्थः । स च ग्रामनिष्ठः । गमनक्रियया चैत्रस्य ग्रामेण सह संयोगः जायते । स च संयोगः ग्रामनिष्ठः । अतः प्रातिपदिकार्थस्य ग्रामस्य द्वितीयाविभ-

क्त्यर्थे संयोगे आधेयतासम्बन्धेनान्वयः ततश्च ग्रामनिष्ठः संयोग इति बोधः। क्वचिदयं सम्बन्धः अनुयोगिप्रतियोगिभावः। यथा 'घटः पटो न' इत्यत्र नञर्थे भेदे पटस्य प्रतियोगितासम्बन्धेनान्वयः । तादृश-भेदस्य च घटे अनुयोगितासम्बन्धेनान्वयः। तथा च 'पटनिष्ठ-प्रतियोगिताकभेदानुयोगी (आश्रयः) घटः' इति बोधः । क्वचिदयं सम्बन्धः विषय-विषयिभावः। यथा- 'चिकीर्षति' इत्यत्र कृञ्धातोः कृतिः अर्थः । 'सन्प्रत्ययस्य इच्छा अर्थः । इच्छायां कृतेः विषयता-सम्बन्धेनान्वयः । तथा च 'कृतिविषयक इच्छा' इत्यर्थः।इदमत्रा-वधेयम्- गदाधरः, [xii]**"नामार्थयोः द्वयोः अभेद एव सम्बन्धः"** । न तु तदतिरिक्तः । प्रत्ययार्थ-नामार्थयोरेव अभेदातिरिक्तः सम्बन्ध इति मन्यते । जगदीशस्तु समासस्थले 'राजपुरुषः' इत्यादै राजपदार्थस्य पुरुषपदार्थेन समं स्वत्त्वसम्बन्धेन (भेदसम्बन्धेन) अन्वयं स्वीकरोति। तदित्थं पदाभ्यां स्मृतयोः अर्थयोः सम्बन्धबोधः शाब्दबोधः । स च सम्बन्धः शक्त्या भासत इति वेदान्तिनः मीमांसकाश्च । अशक्योऽपि आकाङ्क्षादिवशात् भासत इति नैयायिकाः॥

**सन्दर्भसूचि**


i) कौटिल्य (१,२)

ii) अन्नंभट्ट तर्कसङ्ग्रहे (४,१)

iii) न्यायमञ्जरि पृ- ३९३ जयन्त भट्टः

iv) तर्कसङ्ग्रह (४,१)

v) गौतमसूत्र न्यायम् २(१,५३)

vi) दिनकरीयं शब्दखण्ड:

vii) मुक्तावली शब्दखण्डे

viii) मुक्तावली शब्दखण्डे (सन्निधिप्रकरणे)

ix) मध्वाचार्यविरचिते अनुव्याख्याने जिज्ञासाधिकरणे प्रथमभागे

x) कारिकावली शब्दखण्डे(८८)

xi) व्युत्पत्तिवादे प्रथमाविभक्त्यर्थविचारे

xii) दिनकरीशब्दखण्डे